क्वचित्क्रेमल् क्रमेलश्च क्वचित्किं दृष्टमन्तरम्।।
अधीतीसंस्कृतस्यैकः समग्रेऽपि महीतले।
सुखं दिग्विजयं कुर्तं क्षमते नात्र संशयः।।

भारत की समस्त प्रान्तीय भाषाओं की शब्दावलियाँ या तो संस्कृत की तत्सम हैं या फिर तद्भव हैं। इस प्रकार भाषा की दृष्टि से संस्कृत आज भी सम्पूर्ण भारत में जीवन्त है। इतना ही नहीं भारतीय भाषाओं के वाक्य विधान भी संस्कृत से अभिन्न प्रतीत होते हैं। पंजाबी का वाक्य - 'तुसीकित्थे चले नें' संस्कृत के 'त्वं कुत्र चलसि' के सर्वथा समान है। मराठी का वाक्य 'आपणास विनती करण्यात' अथवा हिन्दी का वाक्य - आपसे विनती करती हूँ; को हम बिना किसी परिवर्तन के संस्कृत में इस प्रकार कह सकते है - 'आत्मनः विनतीः क्रियते'। प्रो० राजेन्द्रमिश्र ने 'भारतीय भाषायें एवं संस्कृत' शीर्षक अपने शोधलेख में अन्यान्य भारतीय भाषाओं के उदाहरण प्रभूतमात्रा में दिये है; जो संस्कृत की जीवन्तता के साक्षी हैं।सांस्कृतिकदृष्टि से भी संस्कृत की जीवन्तता स्वतः सिद्ध है। जैसाकि 'संस्कृतशतकम्' में प्रो० मिश्र ने स्पष्ट कहा है - संस्कृतेनैवसंस्काराः संस्कारैरेव संस्कृतिः।

संस्कृत्यैव भुविख्यातं राष्ट्रमार्यं नु भारतम्।।

अर्थात् संस्कृत से ही संस्कारों की व्याख्या समझ में आती है। संस्कारों से ही संस्कृति बनती है और संस्कारों को ही जन्म देने के कारण भारत को आर्यभूमि कहा गया है। संस्कृत का नीतिपरक वाङ्मय भारतीय संस्कृति की बृहत् व्याख्या करता है। भौतिकता से ओतप्रोत आज के समाज में जब लोग नीति, धर्म, सदाचार, लज्जा, शील आदि को ताक पर रखकर पशुता की ओर बढ़ रहे हैं, वहाँ संस्कृत और उसका विशाल वाङ्मय आज भी मानवता की रक्षा के लिए एकमात्र अमोघ उपाय प्रतीत होता है। इसलिए हमें यही आकाँक्षा करनी चाहिए कि हमारा एक-एक क्षण संस्कृत के अध्ययन एवं अध्यापन और चिन्तन में व्यतीत हो। प्रो० अभिराजराजेन्द्र के शब्दों में - संस्कृतेन समायुक्तो दुराहोऽपि मानवः।
मणिना भूषितो भोगी महार्घः सम्प्रतीयते।।

(संस्कृतशतकम्)

संस्कृतेन प्रभातंस्यान्मध्यन्दिनमथो तथा।
संस्कृतेन भवेत्सन्ध्यासंस्कृतेनैव यामिनी।
जननं संस्कृतेनैव संस्कृतेनैव जीवनम्।
मरणं संस्कृतेनैव लोकान्तरगतिस्तथा।।

- संस्कृतशतकम्



अनुसन्धानम् Vol. XXII, No. 2, Dec. 2001, 87-90

87

# काव्यस्यात्मा ध्वनिः

डॉ० मुरलीमनोहरः पाठकः,
वरिष्ठप्राध्यापकः,
स्नातकोत्तरसंस्कृतप्राध्ययनकेन्द्रे
विक्रम-विश्वविद्यालयः,
उज्जयिनी (म० प्र०)।

अस्मिञ्जगति प्रवृत्तिमार्गमवलम्ब्य पुत्रकलत्रादिप्रसक्तमानसैरपि जनैर्ब्रह्मानन्दो यदि लब्धुं शक्येत, तर्हि काव्यगतरसास्वादेनैव। अतो ब्रह्मानन्दसोदरो विगलितवेद्यान्तरः स रसो ध्वनिरूपो व्यञ्जनावृत्तिगम्यो विना ध्वनिज्ञानेन नाधिगतः स्यात्। संस्कृतसमीक्षाशास्त्रे षट् मुख्यानि प्रस्थानानि रसालङ्काररीति ध्वनिवक्रोक्त्यौचित्याख्यानि सन्ति। अत्र ध्वनिप्रस्थानस्य वर्तते महन्महत्त्वं, यतो ह्येनेनैव प्रस्थानेन संस्कृतकाव्यशास्त्रे काव्यसरणौ च काचन नूतना व्यवस्था आनीतेति। भारतीयालङ्कारिकसरणिव्यवस्थापकेन ध्वनिकृता श्रीमदानन्दवर्द्धनाचार्येण प्रारीप्सितस्य ध्वन्यालोकनाम्नो ग्रन्थस्य मङ्गलाचरणरूपेण निर्मितेऽस्मिन् पद्येस्वेच्छाकेसरिणः स्वच्छस्वच्छायायासितेन्दवः[1]।

त्रायन्तां वो मधुरिपो प्रपन्नार्तिच्छिदो नखाः।। इति, तात्पर्यरूपेण वस्त्वलङ्काररसात्मनो ध्वनितत्त्वस्य समुपनिबन्धः कृत इति श्रीमदभिनव गुप्तपादाचार्यैः स्वकीयलोचन व्याख्याने स्वगुरोर्भट्टेन्दुराजस्य व्याख्यानपद्धतिमनुसरद्भिरन्ते लिखितम् एवं वस्त्वलङ्काररसभेदेन त्रिधा ध्वनिरत्र श्लोकेऽस्म द गुरू भिर्व्याख्यात इति[2]

ध्वनेः पूर्वं काव्यतत्त्वानां नासीत् स्पष्टं व्यावृतं च स्वतन्त्रं रूपम्। ध्वनिरेव सर्वाणि काव्यतत्त्वानि स्पष्टान्यकरोत्। ध्वनेरुद् भावनात्पूर्वं गुणालङ्कारयोरन्तरः पार्थक्यं वा नासीत् स्पष्टमूकेवलं तयोर्भेद एव कृत आसीत्। तात्त्विकदृष्ट्या तु तत्र भेदोऽपि न प्रतीयते, यथा वामनः स्वकीये काव्यालङ्कारसूत्रे गुणालङ्कारयोर्भेदं प्रदर्शयन् इदमेव स्वीकुरुते-काव्यशोभाकर्त्तारो धर्मा गुणाः, तदतिशयहेतवश्चालङ्काराः[3] इति। एवं प्रतीयते यद् गुणालङ्कारयोर्न प्रकारकृतस्तत्त्वकृतो वा भेद अपितु मात्राकृत एव।

ध्वनिर्यदा वाच्यमर्थं प्रतीयमानादर्थात् पृथक् करोति, तदा वस्त्वलङ्काररसरूपोऽर्थः प्रतीयमानः अंशवाच्यात् शब्दार्थशरीरात् पृथग् भवति। ततो वाच्याधारे शब्दार्थयोर्वा वर्तमानोऽलङ्कारः प्रतीयमाने रसे वर्तमानाद् गुणात् सर्वथा पार्थक्यं भजति। अर्थात् शरीरेऽलङ्कारः तिष्ठति काव्यस्यात्मनि

श्रव्यकाव्यस्यापि आत्मत्वमभजत अन्ये च अलङ्काररीतिवक्रोक्त्यादयः सम्प्रदायाः ध्वनेः प्रकाशतया स्वस्वस्वरूपमापुरिति। अत एव रसगङ्गा ६ ारकारोऽपीदं स्वीकुरुते ' ६ वनिकृतामालङ्कारिकसरणिव्यवस्थापकत्वा'[10] दित्युक्त्या।

अतः काव्यस्यात्मा ध्वनिरिति सिद्धान्तोऽयं काव्यनिकषपदवीमाटीकते इति शम्।


सन्दर्भाः

1. ध्वन्यालोकः, मङ्गलाचरणम्
2. तत्रैव लोचनम्
3. काव्यालङ्कारसूत्रम् (वामनः) 3.1.1-2
4. काव्यप्रकाशः, सूत्रम्।
5. साहित्यदर्पणः, काव्यलक्षणम्
6. काव्यालङ्कारसूत्रम्, 1-1-1
7. तत्रैव, 1.1.2
8. ध्वन्यालोकः, 1.13
9. काव्यप्रकाशः, सूत्रम् 2
10. रसगङ्गाधरः




अनुसन्धानम् Vol. XXII, No. 2, Dec. 2001, 91-94

# किं मम्मटस्य काव्यहेतुसमुदायसिद्धान्तः सर्वांशतः साधुः?


डॉ॰ भारतेन्दुपाण्डेयः
प्रवक्ता, संस्कृत-विभागः
नानकचन्द-आंग्लसंस्कृत-महाविद्यालयः,
मेरठम्।


'किं काव्यम्' इति जिज्ञासायां सत्याम् अस्याः समाहितिरूपेण प्रथमा बुद्धिरियमेव (तत्र शब्दाः केऽपि भवन्तु नाम) उत्पद्यते यत् ''काव्यं लोकोत्तरवर्णनानिपुणकविकर्म''। (निश्चयेन, अनुवर्तिन्यः सूक्ष्मबुद्धयोऽस्यैव प्राथमिकप्रत्ययस्य विश्लेषणद्वारा काव्यस्वरूपविषयकाणि विविधमतमतान्तराणि प्रतिपादयन्ति।)

इदानीम् अवगन्तुं सहजोत्कण्ठा भवति यत् कवेरस्य लोकोत्तरवर्णनानैपुण्यस्य अंगान्याधारा वा के भवेयुः, यैः समन्वितो भूत्वा स (कविः) ईदृश्याः सृष्टेरनन्यप्रजापतिर्जायते यस्याः (सृष्टेः) परः इयं ब्रह्मणः सृष्टिरपि किमपि न्यूनतरत्वमेव वा 'काव्यहेतुः' 'काव्यकारण' वेत्यभिधा शास्त्रेषु प्रथिता अस्ति।

संस्कृतसाहित्यशास्त्रे काव्यहेतुविवेचनसम्बन्धिनी नितरामेव पुरातनी परम्परा प्राप्यते। भामहाचार्यादारब्धेयं परम्परा अद्ययावद् अक्षुण्णा प्रवहति। समग्रायामेवास्यां परम्परायां (1) प्रतिभा (शक्तिः), (2) व्युत्पत्तिः (श्रुतं निपुणता वा), (3) अभ्यासः (यत्नोऽभियोगो वा) इत्येतानि त्रीण्येव यथाकथमपि काव्यहेतुरूपेण प्रायः सर्वस्वीकृतानि, मतभेदस्तु काव्यकरणे एतेषाम् आनुपातिकभूमिकामेवादाय वर्तते। एतद्विषयाणि मतमतान्तराणि स्थूलतोऽवर्णितवर्गद्वये व्यवस्थापयितुं शक्यन्ते---

1. **समुदितत्रितयवादः** - एतदनुसारं प्रतिभा व्युत्पत्तिरभ्यासश्चेति त्रितयं त्रयं मिलिततयैव काव्यं प्रति हेतुः[1] आचार्यो दण्डी[2] (यद्यप्यंशतः), रूद्रटो[3] मम्मटश्चेत्यादयो[4] वादस्यास्यैव पुरस्कर्तारः सन्ति।

2. **केवलप्रतिभावादः** - एतदनुसारं कविगतप्रतिभैव वस्तुतः काव्यस्य जनदात्री भवति, शिष्टौ व्युत्पत्त्यभ्यासौ तु प्रतिभाया एव उपस्कारको उत साक्षात् काव्यस्यैवोपस्कारको (न तु कारको) भवेताम्। आचार्यहेमचन्द्र[5]-पण्डितराजजगन्नाथ[6]-प्रभृतयः एतद्वादवादिनः

## Rates of Subscription

| | INDIA | ABROADS |
|---|---|---|
| (1) Patrons- | Rs. 5000 | Dollars 200 |
| (2) Life Members- | | |
| (1) Institution | Rs. 2000 | Dollars 300 |
| (2) Individuals | Rs. 1000 | Dollars 150 |
| (3) Annual Members - | | |
| (1) Institution per Issue | Rs. 200<br>Rs. 100 | Airmail Dollars 20<br>Surface Mail Dollars 30 |
| (2) Individuals | Rs. 100 | Dollars 10<br>Surface Mail Dollars 10 |

Cheques/Drafts (to be collected at Meerut Should be in the) name of

चौधरी चरण सिंह विश्वविद्यालय संस्कृताध्यापक परिषद् मेरठ।

All Correspondence should addressed to-
Dr. DURGA PRASAD MISHRA
128, Chandrika, Shivaji Road, Meerut-250001

Printer: श्री Computer, Garh Road Meerut Ph. : 9837150083 (M.)

।। श्रीहरि: ।।

(27)

Vol. XXII
वर्षम् २२

Dec. 2001
जुलाई-दिस.२००१

No. 2
अङ्क:-द्वितीय:

# अनुसन्धानम्

# ANUSANDHANAM

संस्कृत-शोध-पत्रिका
[ SANSKRIT RESEARCH JOURNAL ]

सम्पादक :
डॉ० वेदपाल :

चौधरी चरणसिंहविश्वविद्यालय मेरठ,
संस्कृताध्यापकपरिषद उपक्रम:

रसे वा गुण इति। एवं गुणालङ्कारयोः पार्थक्यं स्पष्टं भवति। अनेनेदमपि निश्चितं भवति यत् काव्यस्यानिवार्यो गुणः गुणो, न तथाऽलङ्कार इति। अर्थात् अलङ्काराभावेऽपि काव्यं भवितुं शक्नोति, किन्तु न कथमपि गुणाभावे। सिद्धान्तस्यास्य पुष्टिं कुर्वन्ति आचार्या मम्मटभट्टा अपि- 'अनलङ्कृती पुनः क्वापि'[4] इत्यनेन।

दर्शनशास्त्रवत् काव्यशास्त्रेऽपि ध्वनेः प्रकाशनात्पूर्वआसीदतीवसंघर्षः। यथा आस्तिकनास्तिकदर्शनयोर्मध्ये परस्परआत्मानात्मविषये विवादः प्रचलति तथैव काव्येऽपि रसालङ्कारयोर्मध्ये विवादो दृश्यते। भरतेन नाट्यशास्त्रे उद्भावितो रसो बहुकालपर्यन्तं काव्यस्य मुख्यतत्त्वरूपेण स्वीक्रियते स्म। अनन्तरं तु भामहोद्भटादिभिराचार्यैरुद्भावितोऽलङ्कारसम्प्रदायः प्राधान्यमाप। एतैरालङ्कारिकै रसोऽपि रसवदलङ्काररूपेण अलङ्कारस्यैवानुयायी। यथा नास्तिकदर्शनं शरीरस्य प्राधान्यं स्वीकृत्यात्मनः प्राधान्यं नैवात्मसात्कुरुते न च मन्यते आत्मानं शरीरादन्यत् किमपि विशिष्टं तत्त्वम्, एवमेवालङ्कारवादी सम्प्रदायोऽपि रसस्य न स्वतन्त्रमलङ्कारातिरिक्तिमस्तित्वं स्वीकुरुते। संस्कृतकाव्य शास्त्रे सम्पूर्णोऽपि प्रस्थानानां प्रसारो रसालङ्कारयोः प्राधान्याप्राधान्यकृत एवास्ति। अत एव सर्वत्र वयं न केवलं काव्यानां तत्त्वेष्वेवापितु काव्यलक्षणेष्वपि परस्परं विरोधं वैमत्यं च पश्यामः। रसस्य प्राधान्यसमर्थकाः कथमप्यलङ्कारस्य प्रतिष्ठां न सहन्त, एवमेवालङ्कारवादिनो रसस्य। अलङ्कारवादिनस्तु न केवलं रसस्यैवापितु रीतेरप्यलङ्कारस्याङ्ग त्वमेवाङ्गीकुर्वंत। अतस्तत्र रसा रीतयश्चालङ्कारत्वं नैव स्वीक्रियन्ते। एवमनयो रसालङ्कारयोर्विवादः तत्र तत्र विविधेषु काव्यलक्षणेषु दृक्पथमायाति। यथा रसवादिनो लाक्षणिकाः 'वाक्यं रसात्मकं काव्यमिति' मन्यन्ते न कथमपि तत्रालङ्कारस्पर्शमपि, एवमेव अलङ्कारपोषकाः 'काव्यं ग्राह्यमलङ्कारात्'[6] 'सौन्दर्यमलङ्कार'[7] इति चोक्त्वा अलङ्काराणामेव काव्येऽनिवार्यतामङ्गीकुर्वन्ति। रसोऽपि चेत् काव्ये वर्तते तदा सोऽलङ्काररूपेणैव स्वीकर्त्तव्यः। एवं सर्वत्रैवैतादृशो विवादः परिलक्ष्यते इति।

परम्परापोषितस्यास्य विवादस्य समन्वयं सहभावं वा कारयितुं ध्वनेरवतारणाऽभूत्। आनन्दवर्धनाचार्यो रसालङ्कारयोरुचितं स्थानं काव्ये ददाति शमयति चानयोर्विवादम्। अत एवानेन कृते ध्वन्यालोकमूलकं ध्वन्यालोके परमादरः क्रियते काव्यरसिकैरिति। वस्तुतो विवादस्यास्यशमनार्थमेव ध्वनौ वस्त्वलङ्काररसभेदेन त्रैविध्यमङ्गीकृतम्। अर्थात् प्रधानव्यङ्ग्यदशायामलङ्कारोऽपि ध्वनित्वं भजति अतिशेते च अलङ्कार एव रसं रसवदलङ्कारो वा। एवं ध्वनिकारो



ध्वनेरवतरणया रसालङ्काराणां वा अवतारणा केवलं प्रबन्धकाव्येष्वेवासीत्। सकलानि मुक्तकानि खण्डकाव्यानि वा रसदृष्ट्या अलङ्कारदृष्ट्या वा न तथा साफल्यमापुः, यतो हि तत्र तत्र वर्णिताः खण्डिता घटना रसार्थमलङ्कारार्थं वा अलं नासन्। तत्राभूदावश्यकता एतस्येदृशस्य नवस्य काव्यतत्त्वस्य, यस्याश्रयणेन काव्यं वास्तविकं काव्यं भवेत् । अभावस्यास्य पूर्त्ति ध्वनिना जाता। ध्वनिरयं यथा प्रबन्धेषु राजते तथैव सीमिते वाक्ये, श्लोके, पदे, वर्णे वा। अतो ध्वनिरेव वास्तविकं काव्यत्त्वं यस्याश्रयणेन काव्यं काव्यं भवतीति। अस्मिन् ध्वनौ सर्वाण्येव काव्यतत्त्वानि रसालङ्काररीतिवक्रोक्त्यौचित्याख्यानि स्वत एव तत्र तत्रान्तर्भावितानि भवन्ति। अतो ध्वनिरयं सर्वाणि पूर्ववर्तीनि परवर्तीनि च काव्यतत्त्वान्यतिशेते।

एतस्य काव्यात्मभूतस्य ध्वनेर्लक्षणं ध्वनिकारेण एवं कृतमयत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।

व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।।[8] इति।

यस्मिन् काव्ये शब्दार्थौ कमपि विलक्षणमेव लोकोत्तरचमत्कारजनकं व्यङ्ग्यार्थं प्रति स्वात्मानं गौणीकृत्य प्राधान्येन विच्छित्तिविशेषाधायकव्यङ्ग्यार्थपरायणौ भवतः तद् ध्वनिनामकमुत्तमं काव्यं स्मृतमिति तात्पर्यम्। तथा च व्यङ्ग्यविशिष्टशब्दार्थोभयत्वमेव ध्वनिकाव्यस्य निकृष्टं लक्षणं पर्यवसितमिति। एवं कामिनीकलेवरे स्तनजघनाद्यवयवातिरिक्तं किमपि युवजनकमनीयं लावण्यमिव महाकविवाणीषु प्रतीयमानं तद् व्यङ्ग्यं नाम वस्तु वाच्यवाचकाभ्यां विलक्षणमेव सहृदयहृदयवेद्यं नापलपितुं शक्यते कथमपि सहृदयैरिति।

अस्यैव पूर्वोद्दिष्टस्य ध्वनिकृतो लक्षणस्यानुसरणं मम्मटादिभिरपि स्फुटतया कृतं तद्यथा- इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः,[9] इति। ध्वनिरयं द्विविधोऽभिधामूलो 'लक्षणामूलश्चेति। तत्राद्यः त्रिविधो वस्त्वलङ्काररसभेदात्। रसध्वनिरपि अलक्ष्यक्रमरूपेण रसभावतदा भासभावशान्ति भावोभयभावसन्धिभावशबलत्वभेदैः शब्दविद्भिः स्वीक्रियते। लक्षणामूलश्च द्वितीयो ध्वनिः अर्थान्तरसङ्क्रमितात्यन्ततिरस्कृतवाच्य भेदेन द्विविधो ज्ञेयः। एवं द्वावप्यमू ध्वनिकाव्यस्यात्मभूताविति। स्वकीयध्वनिलक्षणेन आनन्दवर्धनाचार्यो न केवलं ध्वन्यभाववादिना विरोधमेव खण्डयति, अपितु ध्वनिरेव सर्वेषु षट्स्वपि काव्यतत्त्वेषु मुख्यतममित्यपि निश्चिनोति। वस्तुतो ध्वनिकारेण समेषामपि काव्यलक्षणानां दुर्बलता अपाकृत्य वास्तविकं काव्यलक्षणं निर्मितमिति। भरतेन रसः केवलं दृश्यकाव्ये एव स्वीकृत आसीत्, परन्तु ध्वनिसाहाय्येन पुनरसौ